International Journal of Sanskrit Research 2018; 4(4): 81-85

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 81-85
© 2018 IJSR
www.anantaajournal.com
Received: 15-05-2018
Accepted: 16-06-2018

मासकुरा खातुन
संस्कृत-पालि-प्राकृत विभागः
विश्वभारती, शान्तिनिकेतनम्,
पश्चिम बंगाल, भारत

# देवाचार्यकृतसिद्धान्तजाह्नव्यां मङ्गलाचरणम् : द्वैताद्वैतवादस्य निरूपणम्

## मासकुरा खातुन

०१. ग्रन्थादौ मङ्गलाचरणं भारतवर्षस्य प्राचीना रीतिः। चिकीर्षितग्रन्थस्य विघ्नपरिसमाप्तिकामाभिः ग्रन्थकारैः ग्रन्थारम्भे मङ्गलं कृतम्। मङ्गलशब्दस्य व्युत्पत्तिः शब्दकल्पद्रुमे इदृशा–‘मङ्गति हितार्थं सर्पति सङ्गति दुरदृष्टमनेनास्माद्वेति।’[१] मङ्ग् + अलच् इति मङ्गलम्।[२] अमरकोषदृष्ट्या –‘स्यादानन्दथुरानन्दः शर्मशात्सुखानि च। श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्।’[३] तथा च रामायणे –‘मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव।’[४]मङ्गलस्य आचरणं मङ्गलाचरणम्। षष्ठी[५]इत्यादिना षष्ठीतत्पुरुषसमासः। अन्यथा शिष्टाचारया फललाभं भवति–‘मङ्गलाचरणं शिष्टाचारात्फलदर्शनात् श्रुतितश्चेति।’[६]

अस्य शोधप्रबन्धस्य प्रतिपादनकाम्यविषयः–देवाचार्यकृतसिद्धान्तजाह्नव्यां मङ्गला-चरणं सुन्दरभट्टस्य सिद्धान्तसेतुकायां तस्य व्याख्या च।

२. वेदान्तदर्शनस्य बहवः सम्प्रदायाः प्रवर्तकाश्च। वेदान्तसम्प्रदायेषु द्वैताद्वैतवादः अन्यतमः। प्रवर्तकस्तस्य श्रीनिम्बार्काचार्यः। मतवादेऽस्मिन् प्रतिपादितमेतत् जीव-ब्रह्मणोः सम्बन्धः भेदाभेद एव। भेदाभेदसम्बन्धः द्वैताद्वैतसम्बन्ध इति। तन्मतानुसारी द्वादशः आचार्यः देवाचार्यः। स एव तैलङ्गब्राह्मणः। समयकालस्तस्य १०५६-५७ ख्रीष्टाव्दः। तेन सिद्धान्तजाह्नवीग्रन्थः रचितः। विश्वेऽस्मिन् अनादि वेदान्तसम्प्रदायं प्रवर्तयितुं सकलजन्मादिकारणमोक्षदातृमुक्तोपसृप्य वेदान्तवेद्याखिलकल्याणगुणसम्पन्नभगवता पुरुषोत्तमेन वासुदेवेन प्रदत्ताज्ञा परिपालनाय तदचिन्तशक्त्युपबृंहितान्तशक्तिः भगवान् सुदर्शनो नियमानन्दाभिधार्यरूपेण अवनीतलावतीर्णं भुत्वा वेदान्तपारिजातसौरभाख्यं ग्रन्थरचनाय वाक्यार्थसंग्रहञ्चकार। ग्रन्थश्च विसदीकृतः तस्य शिष्यप्रवरेण श्रीश्रीनिवासाचार्येण। तद्ग्रन्थस्य अतिगम्भीराशयत्वेन मन्दमतीनां शास्त्रार्थजिज्ञासुनां शङ्कानिवृत्यर्थ्यं भगवान् पद्मावतारः श्रीदेवाचार्यरूपेण आविर्भूय विस्तृतं वेदान्तशास्त्रार्थं संक्षेपेण प्रकाशयितुं मितव्याख्यां सिद्धान्तजाह्नवीग्रन्थं विरचयामास। ग्रन्थेऽस्मिन् यथामति पदयोजनं कृत्वा सुन्दरभट्टेन ‘सिद्धान्तसेतुका’ ग्रन्थः कृतः।

**Correspondence**
मासकुरा खातुन
संस्कृत-पालि-प्राकृत विभागः
विश्वभारती, शान्तिनिकेतनम्,
पश्चिम बंगाल, भारत

३.१. निर्विघ्नपरिसमास्त्यर्थं सिद्धान्तजाह्नवीकारेण देवाचार्येण ग्रन्थादौ मङ्गलाचरणं कृतम्। इदृशं तत –

'नियमेन यदानन्दो जगद्भासयतेऽखिलम्।
तमहं नियमानन्दं वन्दे कृष्णं जगद्गुरुम्॥'७

अनेन मङ्गलाचरणेन प्रतिपादितमेतत् – यदानन्दो नियमेनाखिलं जगद्भासयते अहं तं नियमानन्दं जगद्गुरंवन्दे।

अस्य व्याख्यायां सुन्दरभट्टेनोक्तम् –

'शास्ता बुद्धेर्यश्च विश्वस्य हेतुः
कर्माध्यक्षः सर्वभुतान्तरात्मा।
देवाचार्यस्तस्य देवस्य रूपं
भर्गं नित्यं चिन्तयेऽहं वरेण्यम्॥'८

अनेन विश्वस्यहेतुं ब्रह्म देवाचार्यंच नमस्कारादनन्तरं देवाचार्यकृतमङ्गलाचरणस्य व्याख्या कृता सुन्दरभट्टेन।

३.२. देवाचार्योक्तस्य मङ्गलाचरणस्य व्याख्या द्विविधा। परमेश्वरविषयिकाआचार्यविषयिका चेति। तत्र परमेश्वरपरत्वेन आदौ व्यक्रियते –'तं कृष्णमहं वन्दे इत्यादिः।' निरुक्ते कृष्णशब्दस्य पर्यायरूपेण 'नियमानन्दं' पदं पठितम्। नियमो देशकालवस्त्वपरिच्छिन्नं सद्वस्तुः स चासावानन्दश्चेति नियमानन्दः समस्तदेशकालवस्तुव्यापकसदानन्दस्वरूपः। ब्रह्मणः सदानन्दत्वे श्रुतिः –'आनन्दो ब्रह्मणो विद्वान्'७, 'आनन्दो ब्रह्मेति व्याजानात्'८ इत्यादिः। कृष्णशब्दस्य व्याख्यायां सुन्दरभट्टेन श्रीधरस्वामीकृत लक्षणमुक्तं तस्य टीकायां –

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥९

कृषिः संसारः, ण– निवृत्तिः। कृषेः न इत्यादिना पञ्चमीतत्पुरुषसमासेन गठितमिदं 'कृष्ण' पदम्।१० अतएव कृष्णः जगद्भिन्न इति। सदृशः श्लोकः महाभारतेऽपि परिलक्ष्यते –

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
कृष्णस्तदभावयोगाच्च कृष्णो भवति स्वात्त्वतः॥११

कृष्णशब्दस्य व्युत्पत्तिः इदृश – कर्षत्यरीन् महाप्रभावशक्त्या यद्वा कर्षति आत्मसात् करोति आनन्दत्वेन परिणमयतीति मनो भक्तानां इति यावत्१२ बाहुलकात् वर्णं विनापि। नक् णत्वञ्च। यद्वा कर्षति सर्व्वान् खकुक्षौ प्रलयकाले। कर्षणात् कृष्ण इति। यद्वा कर्षति पापानि शरणागतानां बाहुलकात् कृषेर्नक् वर्णं विनापि नत्वञ्च। परब्रह्मेति। परन्तु सुन्दरभट्टकृत व्याख्यायां इदृशा व्युत्पत्तिः न उल्लिखिता। तेन जगद्भिन्नं कृष्णमिति व्याख्यातम्। अनेन सत्यं ज्ञानमनन्तं ब्रह्मेति वचनं प्रकाशितम्।

अथ लक्षणान्तरमाह नियमेन यदानन्द इत्यादिना। 'यदानन्द' इति पदम् द्विविधेन समस्यते द्विविधो अर्थोऽस्यानेन। यथा यदानन्दो यश्चासावानन्दश्चेति कर्मधारयसमासः।१३ अत्र 'यत्'– पदेन समस्तवेदान्त प्रसिद्धः श्रीपुरुषोत्तमपरामर्शपरं ब्रह्म बोध्यते। 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः'१४, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति'१५ इत्यादिना तत् प्रतिपादितम्। एतद्भिन्नं 'यतो वाचो निवर्तन्ते'१६, 'स यश्चायं पुरुषे यश्चासावादित्ये'१७, 'यद्वै तत् सुकृतम्'१८, 'श्रोत्रस्य श्रौत्रं मनसो मनो यद्'१९ इत्यादिषु श्रुतिष्वापि 'यद्' पदेन ब्रह्म निर्देशितम्। व्याकरणदृष्ट्वावपि 'यद्' शब्दः ब्रह्मबोधको यतः उभौ क्लीवलिङ्गशब्दौ।

अस्य द्वितीया व्याख्या एषा – यस्य आनन्दः यदानन्दः इति षष्ठीतत्पुरुषः समासः।२० एतेन 'आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चनेति'२१ इति व्याख्यातम्। आनन्दस्वरूपं ब्रह्म न दुःखमिति। यस्य आनन्दस्वरूपस्य ज्ञानं भवति, स ब्रह्मैव भवति –'ब्रह्म वेद ब्रह्मैव भवति'२२, यः ब्रह्म जानाति स कुतोऽपि न विभेति। आनन्दशब्दः आनन्दस्वरूपस्य वोधकः। 'विज्ञानमानन्दं ब्रह्म'२३, 'प्रज्ञानं ब्रह्म'२४ इत्यादिः श्रुतेः। सुन्दरभट्टेनोक्तम् –'तथाहि यस्य परब्रह्मणो गुणरूप आनन्दोऽखिलं जगद् दुःखादिसम्पन्नतया बन्धकारणत्वेन भासयते, दर्शयित्वा ततो मोचयतीति भावः।'

द्वैताद्वैतमतेन तु आनन्दो ब्रह्मणो गुणम्, अनेन ब्रह्म सगुणमिति प्रतिपादितम्, न निर्गुममिति तेषां मतम्। एतेन आनन्दोमात्रमेव ब्रह्म नानन्दगुणकमिति पूर्वपक्षो निरस्तः।

मङ्गलाचरणे जगद्भासयतेऽखिलम् इति पदं वर्तते। ब्रह्म अखिलं जगद्भासयते इत्यन्वयः। अखिलं चेतनाचेतनरूपेणानन्तविचित्रविशेषसम्पन्नं जगद्भासयते, प्रलये सुक्ष्मावस्थापन्नमव्यक्तनामरूपकं व्यक्तनामरूपावस्थं कृत्वा दर्शयतीति यावत्, 'आनन्दाध्येव खल्विमानि भूतानि जायन्ते'२५ इत्यादिः श्रुतेः। ब्रह्म आनन्दस्वरूपम्, तस्माद् जगदुत्पद्यते, 'तदैक्षत बहुस्यां प्रजायेयेति'२६ श्रुतेः। अनेन आनन्दस्वरूपब्रह्मणः जगदुत्पद्ये, ब्रह्म जगद्भासयते इत्यादिः प्रतिपद्यते। अथ विश्वहितोपदेष्टाऽपि स एव इत्येवबोधार्थं जगद्गुरुमिति पदमाह। जगतो ब्रह्मादिस्थावरान्तस्य हितोपदेष्टा तद् ब्रह्म। यद्वा ब्रह्मादीनामाचार्यत्वेन प्रसिद्धानामपि विद्योपदेष्टा वेदप्रवर्तकत्वात्, 'यो ब्रह्माणं विदधाति पूर्वं यो वै देवांश्च प्रहिनोति तस्मै। तं ह

देवतात्मबुद्धिप्रकाशकं मुमुक्षुर्वै शरणं प्रपद्ये'२७ इति श्रुतेः। यद्वा जगद्गुरुमिति जगद्विषयकान्धकारनाशकमित्यर्थः। अद्वयतारोकोपनिषदतः गुरुशब्दस्य निर्वचनं सुन्दरभट्टेन टीकायां गृहीतम् –

गुशब्दस्त्वन्धकाराख्यः रुसब्दस्तन्निरोधकः।
अन्धकारविरोधित्वाद् गुरुरित्यभिधीयते॥२८

जगद्विषयकान्धकारनाशकं ब्रह्म, 'तस्य भासा सर्वमिदं भाती'ति श्रुतेः।२९ परन्तु गुरुशब्दस्य संज्ञायां मनुसंहिताकारेनोक्तम् –

निषेकादीनि कर्माणि यः करोति यथाविधि।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते॥३०

सुन्दरभट्टोक्तगुरुशब्देन सह मनुसंहिताकारोक्तगुरुशब्दस्यान्तरो विद्यते।
मङ्गलाचरणे 'अहं वन्दे' इत्युक्तं देवाचार्येण। अत्र एकवचनं जात्यभिप्रायकम्।

अहमर्थत्वावच्छिन्नैर्जीवात्मभिर्देवपदार्थाभिन्नकृष्णपदार्थः सततं वन्दनार्चनाऽऽद्युपासना विषयत्वेन भावनीयः। अस्मदर्थानां तदात्मकत्वात् तन्नियम्यत्वात् तद्व्याप्यत्वाच्च, तस्य च सर्वात्मत्वात् सर्वनियन्तृत्वात् सर्वव्यापकत्वाच्च।

यच्च किं चिज्जगत्यस्मिन् दृश्यते श्रुयतेऽपि वा।
अन्तर्वहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥३१

अतएव इदृशं नारायणरूपब्रह्म देवाचार्येण नमस्कृतम्।

३.३. अथ आचार्यपक्षे व्याख्यानमुच्यते नियमेनेति। तं नियमानन्दं गुरुमहं वन्दे इति। नियमोऽत्र व्याभिचाराभाव ऐकान्तमिति यावत्। यदानन्दपदस्यासयः यस्योपदिष्टो ब्रह्मविषयभूत आनन्द ऐकान्तेनाखिलं जगद्भासयते तं वन्दे इत्यर्थः। अखिलं भोक्तृभोग्यनियन्तृरूपं तत्त्वमित्यर्थः। इदृशं जगद्विषयकतत्त्वं येन गुरुणा उद्भाव्यते मया स वन्दनीयरित्यर्थः। जगदित्यत्र चतुर्थ्यर्थे द्वितीया। 'भास्' इत्यस्य णिजन्तं भूत्वा 'भासयते' पदं गठितम् अर्थात् प्रकाशयते इति। जगते विश्वस्मै सर्वं तत्त्वं प्रकाशयते इत्यर्थः। जगत्शब्दश्चात्र चेतनाचेतनविशेषमुमुक्षुवाचकः, अचेतनस्य ज्ञानाश्रयत्वाभावेनोपदेशानर्हत्वात्। तथा च श्रुतिः 'तस्मै स विद्वानुपसन्नाय सम्यकप्रशान्तचित्ताय शमन्विताय येनाक्षरं परमं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां ..........'३२ श्रोत्रियः ब्रह्मज्ञः गुरुः प्रशान्तचित्ताय शमन्विताय शिष्याय ब्रह्मविद्यां ददाति। एनां दिशं गन्धारा, एनां दिशं ब्रजेति इत्यादिना अन्येषां वाक्येन यथा पण्डितः गान्धारदेशं प्राप्नोति तद्वद् गुरुपोदेशेन शिष्योऽपि ब्रह्मज्ञानं लभते। अतएव तस्यैव भगवद्भावं विधत्ते, 'आचार्यवान् पुरुषो वेद'३३ श्रुतेः।

अथ आचार्यपक्षे कृष्णशब्दस्य व्याख्यायां सुन्दरभट्टेनोक्तम् – कृष्णमिति आचार्यावताररूपं भगवन्तमित्यर्थः। इदृशं भगवन्तं वन्दे। आचार्यः भगवत्शक्तिसम्पन्नः, स देवस्वरूपः 'आचार्यदेवो भव'३४ इति श्रुतेः। स एव भगवच्छक्त्युपबृंहिताचिन्त्यशक्तित्वेन तत्वाभिधानशक्तिसम्पन्नः। आचार्यात् विद्या लभन्ते शिष्याः –'आचार्याद्धैव विद्या विदिता स्वाधिष्टं प्रापत्'३५ इदृश आचार्य एव देवाचार्येण वन्दितः। मङ्गलाचरणेऽस्मिन् अहमित्युपलक्षणं श्रेयोऽर्थीभिर्मुमुक्षुभिराचार्यैः वरणीयं श्रीकृष्णस्य पदयुगलमित्यर्थः।

४. श्रीनिम्बार्कप्रवर्तितद्वैताद्वैतदर्शनम् अन्यतमम्। मतवादेऽस्मिन् चिदचित्कालश्च त्रिविधवस्तुः प्रतिपद्यते। तत्र जीवब्रह्मणोः सम्बन्धः न केवलं द्वैत अपि तु अद्वैतश्च। जीव-ब्रह्मणोः द्वैतसम्बन्धः विद्यते यतः जीवः सृष्टपदार्थः ब्रह्म च स्रष्टा, जीवोऽनुः ब्रह्म च विभू, जीवोऽनित्यः ब्रह्म नित्यश्च, ब्रह्म अनादि जीवश्चादियुक्तः, परमात्मा सर्वनियन्ता, कर्ता, सर्वज्ञः व्यापकश्च परन्तु जीवो नियन्त्रितः, अल्पज्ञः, व्याप्यश्च। अतएव जीव-ब्रह्मणोः पृथक्ता विद्यते, भेदश्चास्ति। 'अस्ति खल्वन्योऽपरो भूतात्मा'३६ 'बालाग्रशतभागस्य'३७ 'तदैक्षत बहुस्यां प्रजायेयेति'३८, 'आनन्दाद्धेव खल्विमानि भुतानि जायन्ते ...'३९ इत्यादिः श्रुतेः। तयोः सम्बन्धः अद्वैतापि च। जीवो ब्रह्मणः उत्पद्यते। ब्रह्म जीवानामुपादानकारनम्। अत्र जीवः कार्यः ब्रह्म च कारणम्। यतः कारणात् कार्यमुद्पद्यते अतः कारणं कार्यादभिन्नम्। अतएव जीव-ब्रह्मणोः सम्बन्धः अद्वैत एव। तद्विषयकश्रुतयः –'सदेव सौम्य इदमग्र आसीत्'४०, 'आत्मा वा इदमेक एवाग्र आसीत्'४१'तत्वमसि'४२, 'अयमात्मा ब्रह्म'४३ इत्यादयः।

देवाचार्यकृतसिद्दान्तजाह्नव्यां 'नियमेन यदानन्द' इत्यादिना कृते मङ्गलाचरणे द्वैताद्वैतवादः प्रतिष्ठितः। तत्र जगद्भासयतेऽखिलमित्यादिना ब्रह्म जगतः उपादानकारणमिति प्रतिपद्यते। कारणं विना कार्यो नोत्पद्यते, कार्यः कारणादभिन्नम् अतः ब्रह्म जीव-जगत्योऽभिन्नम्। प्रथमचरणे जीव-ब्रह्मणोः अद्वैतसम्बन्धः प्रस्फुटितः। द्वितीये चरणे जीव-ब्रह्मणोः 'तमहं नियमानन्दं वन्दे कृष्णं जगदगुरुम्' इत्यादिना द्वैतसम्बन्धः प्रतिपद्यते। तत्र अहं वन्दे जगदगुरुं कृष्णमित्यादिवाक्ये अहं इति पदेन जीवः उपलक्षितः, जगदगुरु कृष्ण पदेन ब्रह्म उपलक्षितम्। अतः ब्रह्म जीवानां प्रणम्यं इति प्रकटितम्। अतः जीवः न ब्रह्म। तयोः सम्बन्धः द्वैतापि।

इत्थं मङ्गाचरणेऽस्मिन् जीव-ब्रह्मणोः द्वैताद्वैतसम्बन्धः प्रस्फुटितः।

**पादटीका**

१. उणा. ५।७०।

२. रामायणम् –२।२३।२९।

३. पा.सु. –२।२।८।

४. सांख्यदर्शनम् –५।१।

५. तै.उ. –२।९।२।

६. तै.उ. –३।६।१।

७. श्रीधरस्वामी।

८. पा.सु २।१।३८–'अपेतापोढ-मुक्त-पतितापत्रस्तैरल्पशः।'

९. महाभारतम् ।५। यानपर्वाध्यायः ।७०।५।

१०. 'कृषेर्वर्णे' उणं –३।४।

११. पा.सु. १।२।४२– तत्पुरुषसमानाधिकरणः कर्मधारयः।

१२. मु.उ. –१।१।९।

१३. तै.उ. –१।३।३।

१४. तै.उ. –२।९।१।

१५. तै.उ. –२।८।५।

१६. तै.उ. –२।१।७।

१७. केन.उ. –१।२।

१८. पा.सु. –२।२।८–'षष्ठी'।

१९. तै.उ.–२।९।१।

२०. मु.उ. –३।२।१।

२१. बृह.उ. –३।९।८।

२२. ऐत. –५।३।

२३. तै.उ. –३।६।१।

२४. छा.उ. –६।२।९।

२५. श्वेता.उ. –६।१८।

२६. अद्वै.ता.उ. –१।५।

२७. मु.उ. –२।२।१०।

२८. मनु. –२।१४२।

२९. अमरटीका/भरतः।

३०. मु.उ. –१।२।१३।

३१. छा.उ. –६।१४।२।

३२. तै.उ. –१।११।२।

३३. छा.उ. –४।९।३।

३४. मै.उ. ३।२।

३५. श्वेता.उ. –५।९।

३६. छा.उ. –६।२।३।

३७. तै.उ. –३।६।

३८. छा.उ. –६।२।१।

३९. ऐ.उ. –१।१।

४०. छा.उ. –६।८।७।

४१. बृह.उ. –२।५।१९।

**संक्षेपसूचि**

अद्वै. ता. उ. – अद्वैतारोकपनिषद्

उ. – उपनिषद्

उणा. – उणादि

ऐत. – ऐतरेयोपनिषद्

केन. उ. – केनोपनिषद्

छा.उ. – छान्दोग्योपनिषद्

तै.उ. – तैत्तिरीयोपनिषद्

बृह. उ. – बृहदारण्यकोपनिषद्

मनु. – मनुसंहिता

मु.उ. – मुण्डकोपनिषद्

मै.उ. – मैत्रायण्युपनिषद्

१म – प्रथमम्

४र्थ – चतुर्थः

६ष्ट - षष्टः

**ग्रन्थसूची**

1. अमरसिंहः : अमरकोषः - [महेश्वरः टीका सहितः]। सम्पादकः वामनाचार्यः झलकिकरः। दिल्लि ; इस्टार्ण बुक् लिङ्कार्स, २००२ (१म संस्करणम्)।

2. उपनिषद् ग्रन्थावली। सम्पादकः स्वामी गम्भीरानन्दः। कलकाता ; उद्बोधन कार्यालयः। २०१३ (२० तमम् पुनर्मुद्रणम्, १९६४ पञ्चमसंस्करणस्य) (काण्डम् –२), २०१३ (३७ तमम् पुनर्मुद्रनम्, १९६२ सप्तमसंस्करणस्य)।
3. उपनिषद्-संग्रहः। जे.एल. शास्त्री। दिल्लि ; एम्. एल्. बि. डि. १९९८ (४तमम् पुनर्मुद्रणम् १९७० प्रथमसंस्करणस्य)।
4. ब्रह्मसूत्र-निम्वार्कभाष्यम्; श्रीनिवासाचार्यस्य बेदान्तकौस्तुभः, केशवकाश्मीरिभट्टस्य बेदान्तकौस्तुभप्रभा, अमलकरामस्य भावदीपिकाटीकासहितः। सम्पादकः मदन मोहन आगरवाल। दिल्लि ; चौखाम्वा संस्कृत प्रतिष्ठान्। २०००(१म संस्करणम्) (काण्डे १म ४र्थञ्च)।
5. वाल्मीकिः : रामायणम् [तिलकः, शिरोमणिः, भूषणटीकासहितः]। सम्पादकः शास्त्री श्रीनिवास कत्ति मुधलकारः। दिल्लि ; परिमल पाबलिकेशन, १९८३ (१म संस्करणम्) (काण्डम् –२)।
6. बाहादुर, राधाकान्तदेवः : शब्दकल्पद्रुम। संपरिबर्धकौ वरदाप्रसाद वसुः हरिचरण वसुः च। कलकाता ; बापटिस्ट मिसन प्रेस्। १८०८ शकाब्दः (६ष्ट संस्करणम्)।
7. वांला विश्वकोष ; सम्पादकः नगेन्द्रनाथ वसुः। दिल्लि ; बि.आर. पाबलिशिं हाउस्। १९८८ (१म पुनर्मुद्रणम्,१८८६-१९११, १म संस्करणस्य)। (काण्डम् –१०)।
8. भट्टाचार्य अमरप्रसादः। श्रीनिम्वार्क ओ द्वैताद्वैतदर्शन। कलिकाता(कलकाता) ; संस्कृत पुस्तक भाण्डार, १९६६ (१म संस्करणम्)।
9. भट्टोजि दीक्षितः सिद्धान्तकौमुदी। सम्पादकः अनुवादकश्च श्रीशचन्द्र वसुः। दिल्लि ; मोतिलाल बानारसिदास। १९६२ (१म पुनर्मुद्रणम्, १९०६ प्रथमसंस्करणस्य)।
10. मनु : मनुसंहिता। सम्पादकः अन्नदाशसङ्कर पाहारी। कलकाता ; संस्कृत बुक डिपो, २००५ (१म संस्करणम्)।